3 July 2021

॥ श्री ॥

## ॥ गणपतिस्तवः ॥

ऋषिरुवाच ---

अजं निर्विकल्पं निराकारमेकं
निरानन्दमानन्दमद्वैतपूर्णम् ।
परं निर्गुणं निर्विशेषं निरीहं
परब्रह्मरूपं गणेशं भजेम ॥१॥
गुणातीतमानं चिदानन्दरूपं
चिदाभासकं सर्वगं ज्ञानगम्यम् ।
मुनिध्येयमाकाशरूपं परेशं
परब्रह्मरूपं गणेशं भजेम ॥२॥
जगत्कारणं कारणज्ञानरूपं
सुरादिं सुखादिं गुणेशं गणेशम् ।
जगद् व्यापिनं विश्ववन्द्यं सुरेशं
परब्रह्मरूपं गणेशं भजेम ॥३॥
रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं
सदा कार्यसक्तं हृदाऽचिन्त्यरूपम् ।
जगत्कारणं सर्वविद्यानिदानं
परब्रह्मरूपं गणेशं नताः स्मः ॥४॥
सदा सत्ययोग्यं मुदा क्रीडमानं
सुरारीन् हरन्तं जगत्पालयन्तम् ।
अनेकावतारं निजज्ञानहारं
सदाविश्वरूपं गणेशं नमामः ॥५॥
तमोयोगिनं रुद्ररूपं त्रिनेत्रं
जगद्धारकं तारकं ज्ञानहेतुम् ।
अनेकागमैः स्वं जनं बोधयन्तम्
सदा सर्वरूपं गणेशं नमामः ॥६॥
तमः स्तोमहारं जनाज्ञानहारं
त्रयीवेदसारं परब्रह्मसारम् ।
मुनिज्ञानकारं विदूरे विकारं
सदा ब्रह्मरूपं गणेशं नमामः ॥७॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| NOVEMBER '14 | 30 | | | | | | 1 |
| | 2 | 3 | 4 | 5 | 6 | 7 | 8 |
| | 9 | 10 | 11 | 12 | 13 | 14 | 15 |
| | 16 | 17 | 18 | 19 | 20 | 21 | 22 |
| | 23 | 24 | 25 | 26 | 27 | 28 | 29 |
| | S | M | T | W | T | F | S |

© www.madhuraveeraghuveer.com

निर्जरौघधीस्तर्पयन्तं करार्द्धैः
सुरौघान्कलाभिः सुधास्राविणीभिः ।
दिनेशांशुसन्तापहारं द्विजेशं
शशांकस्वरूपं गणेशं नमामि ॥८॥

प्रकाशस्वरूपं महत् तत्त्वरूपं
धराचारिरूपं दिगीशादिरूपमे ।
असत्यस्वरूपं जगद्धेतुरूपम्
सदा विश्वरूपं गणेशं नताः स्मः ॥९॥

प्रधानस्वरूपं महत्तत्त्वरूपम्
धराचारिरूपं दिगीशादिरूपम् ।
असत् सत्स्वरूपं जगद्धेतुरूपं
सदा विश्वरूपं गणेशं नताः स्मः ॥१०॥

त्वदीये मनः स्थापयेदङ्घ्रियुग्मे
जनो विघ्नसंघातपीडां लभेत ।
लसत् सूर्यबिम्बे विशाले स्थितोऽयं
जनो ध्वान्तपीडां कथं वा लभेत ॥११॥

वयं भ्रामिताः सर्वथाऽज्ञानयोगाद्
अलब्ध्वा तवाङ्घ्रिं बहून् वर्षपूगान् ।
इदानीमवाप्तास्तवैव प्रसादात्
प्रपन्नान् सदा पाहि विश्वम्भराद्य ॥१२॥

एवं स्तुतो गणेशस्तु
सन्तुष्टोऽभून्महामुने
कृपया परयोपेतो
ऽभिधातुमुपचक्रमे ॥१३॥

इति श्रीमद् गर्गमुनिकृतो गणपतिस्तवः संपूर्णः ॥

| JANUARY '15 | | | | | | |
|---|---|---|---|---|---|---|
| | | | 1 | 2 | 3 | 4 |
| 5 | 6 | 7 | 8 | 9 | 10 | 11 |
| 12 | 13 | 14 | 15 | 16 | 17 | 18 |
| 19 | 20 | 21 | 22 | 23 | 24 | 25 |
| 26 | 27 | 28 | 29 | 30 | 31 | |
| M | T | W | T | F | S | S |

प्रकाशस्वरूपं नमो वायुरूपं
विकारादिहेतुं कलाधाररूपम् ।
अनेकक्रियानेकशक्तिस्वरूपं
सदा शक्तिरूपं गणेशं नमामः ॥५॥